तस्मादव्यक्तानुकरणाद् अनितिपराड् डाच् प्रत्ययो भवति। कृभ्वस्तियोगे [1]इत्यनुवर्तते। [2]यस्य च द्विर्वचने कृते [3]द्व्यजवरार्धं ततः प्रत्ययः। 'डाचि बहुलं द्वे भवतः' (६.१.९९/८२ वा.) इति विषयसप्तमी। डाचि विवक्षिते द्विर्वचनमेव पूर्वं [4]क्रियते, पश्चात्[5] प्रत्ययः। [6]पटपटाकरोति। पटपटाभवति। पटपटास्यात्। दमदमाकरोति। दमदमाभवति। दमदमास्यात्। अव्यक्तानुकरणात् इति किम्? दृषत्करोति। द्व्यजवरार्धात् इति किम्? श्रत्करोति। अवरग्रहणम् किम्? खरटखरटाकरोति। त्रपटत्रपटाकरोति। अनितौ इति किम्? पटिति करोति। चकारः स्वरार्थः, स्वरितबाधनार्थः। पटपटासि, [7]अत्र 'स्वरितो वाऽनुदात्ते पदादौ' (८.२.६/३६५९) इति [8]स्वरितो न भवति। केचिद् द्व्यजवरार्ध्यादिति [9]यकारं पठन्ति, स स्वार्थिको विज्ञेयः॥

## कृञो द्वितीयतृतीयशम्बबीजात् कृषौ। (५८/२१२९)

[10]द्वितीयतृतीयादिभ्यः शब्देभ्यः कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे, [11]नान्यत्र। [12]पुनः कृञ्ग्रहणं भ्वस्त्योर्निवृत्त्यर्थम्। द्वितीयाकरोति। द्वितीयं कर्षणं विलेखनं[13] करोति इत्यर्थः। तृतीयाकरोति। शम्बा[14]करोति। अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषति इत्यर्थः। बीजाकरोति। सह बीजेन[15] विलेखनं करोति इत्यर्थः। कृषौ इति किम्? द्वितीयं करोति [16]पदम्॥

## सङ्ख्यायाश्च गुणान्तायाः। (५९/२१३०)

कृञः इति अनुवर्तते, कृषौ इति च। सङ्ख्यावाचिनः [17]शब्दस्य गुणशब्दोऽन्ते समीपे यत्र [18]सम्भवति सा सङ्ख्या गुणान्ता इत्युच्यते। तादृशात् प्रातिपदिकात् [19]कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे। द्विगुणं [20]विलेखनं करोति क्षेत्रस्य [21]द्विगुणाकरोति क्षेत्रम्। त्रिगुणाकरोति[22]। कृषौ इति किम्? द्विगुणां करोति रज्जुम्[23]॥

## समयाच्च यापनायाम्। (६०/२१३१)

कृञः इत्येव। कृषौ इति निवृत्तम्। [24]कर्तव्यस्यावसरप्राप्तिः समयः, तस्यातिक्रमणं यापना। समय-शब्दाद् यापनायां गम्यमानायां डाच् प्रत्ययो भवति कृञो योगे। समयाकरोति। समयं यापयति, कालक्षेपं करोति इत्यर्थः। यापनायाम् इति किम्? समयं करोति[25]॥

---

1. इति निवृत्तम् क, इति निवर्तते ह 2. यत्र क. ड. 3. द्व्यजवरार्धता सम्भवति क. ड. फ. ह. 4. क्रियते नास्ति क. 5. डाच् प्रत्ययः ह. 6. उदाहरणमिदं नास्ति क. 7. अत्र नास्ति क. 8. स्वरित-प्रत्ययः ब. क. ड. 9. यकारान्तं ड. 10. द्वितीया तृतीया इत्येतेभ्यः ब. क. ह. 11. सति इत्याधिकम् क. ड, नान्यत्र नास्ति फ. 12. पुनः नास्ति क. 13. क्षेत्रस्य इत्यधिकम् ब. ड. 14. कृषति ब. क. ड. 15. कृषति इत्यधिकम् क. फ 16. पटम् ब. क. ड. ग. फ. ह. 17. शब्दस्य–सा सङ्ख्या नास्ति फ 18. भवति क. 19. कृषावभिधेयात् ह. 20. विलेखनं नास्ति फ. 21. द्विगुणं ह, द्विगुणीकरोति, द्विः कृषति इत्यर्थः क. 22. क्षेत्रम् इत्यधिकम् ड. 23. त्रिगुणां करोति रज्जुम् इत्यधिकम् फ. 24. कर्तव्यावसरप्राप्ति क. ह. 25. मिथो महाजनः सशपथं संकेतम् करोति इत्यर्थः इत्यधिकम् ड.